INDIAN JOURNAL OF HISTORY OF SCIENCE

Vol. 24 July 1989 No. 3

Supplement

RASA RATNA SAMUCCAYA

(Continued)

Sixth Chapter

Sanskrit Text

English Translation

Notes

अथ षष्ठोऽध्यायः

शिष्योपनयनादिनिरूपणीयम्

शिष्योपनयननिरूपणम् –

रसशास्त्राणि सर्वाणि समालोच्य यथाक्रमम् ।
साधकानां हितार्थाय प्रकटीक्रियतेऽधुना ॥ 1 ॥
न क्रमेण विना शास्त्रं न शास्त्रेण विना क्रमः ।
शास्त्रं क्रमयुतं ज्ञात्वा यः करोति स सिद्धिभाक् ॥ 2 ॥

रसाचार्यलक्षणम् –

आचार्यो ज्ञानवान्दक्षो रसशास्त्रविशारदः ।
मन्त्रसिद्धो महावीरो निश्चलः शिववत्सलः ॥ 3 ॥
देवीभक्तः सदा धीरो देवतायागतत्परः ।
सर्वाम्नायविशेषज्ञः कुशलो रसकर्मणि ।
एवं लक्षणसंयुक्तो रसविद्यागुरुर्भवेत् ॥ 4 ॥

रसशास्त्रशिष्यलक्षणम् –

गुरुभक्ताः सदाचाराः सत्यवन्तो दृढ़व्रताः ।
निरालस्याः स्वधर्मज्ञाः सदाऽज्ञापरिपालकाः ॥ 5 ॥
दम्भमात्सर्यनिर्मुक्ताः कुलाऽचारेषु दीक्षिताः ।
अत्यन्तसाधकाः शान्ता मन्त्राऽराधनतत्पराः ॥
इत्येवं लक्षणैर्युक्ताः शिष्याः स्युः सूतसिद्धये ॥ 6 ॥

रससहायकलक्षणम् –

सहायाः सोपमास्तत्र यथा शिष्यास्ततोऽधिकाः ।
कुलीनाः स्वामिभक्ताश्च कर्तव्या रसकर्मणि ॥ 7 ॥

रसशास्त्रसिद्धौ अग्राह्याः –

नास्तिका ये दुराचाराश्चुम्बका गुरुतोऽपरात् ।
विद्यां ग्रहीतुमिच्छन्ति चौर्यच्छद्मखलोत्सवात् ॥ 8 ॥
न तेषां सिध्यते किंचिन्मणिमन्त्रौषधादिकम् ।

कुर्वन्ति यदि मोहेन नाशयन्ति स्वकं धनम् ॥
इह लोके सुखं नास्ति परलोके तथैव च ॥ 9 ॥

गुरोर्रसविद्याग्रहणविधिः –

तस्माद्भक्तिबलादेव सन्तुष्यति यदा गुरुः ।
तदा शिष्येण सा ग्राह्यारसविद्याऽत्मसिद्धये ॥
हस्तमस्तकयोगेन वरं लब्ध्वा सुसाधयेत् ॥ 10 ॥

रसराजसाधनस्थलनिर्देशः –

आतंकरहिते देशे धर्मराज्ये मनोरमे ।
उमामहेश्वरोपेते समृद्धे नगरे शुभे ॥ 11 ॥
कर्तव्यं साधनं तत्र रसराजस्य धीमता ।

रसशालास्वरूपम् –

अत्यन्तोपवने रम्ये चतुर्द्वारोपशोभिते ॥ 12 ॥
तत्र शाला प्रकर्तव्या सुविस्तीर्णा मनोरमा ।
सम्यग्वातायनोपेता दिव्यचित्रैर्विचित्रिता ॥ 13 ॥

रसमण्डपनिर्माणनिर्देशः –

तत्समीपे समे दीप्ते कर्तव्यं रसमण्डपम् ।
अतिगुप्तं सुविस्तीर्णं कपाटार्गलशोभितम् ॥ 14 ॥
ध्वजच्छत्रवितानाद्यं पुष्पमालाऽविलम्बितम् ।
भेरीकाहलघण्टादिशृंगीनादविनादितम् ॥ 15 ॥
भूः समा तत्र कर्तव्या सुदृढ़ा दर्पणोपमा ।
तन्मध्ये वेदिका रम्या कर्तव्या लक्षणान्विता ॥ 16 ॥

रसलिंगनिर्माणम् –

निष्कत्रयं हेमपत्रं रसेन्द्रं नवनिष्ककम् ।
अम्लेन मर्दयेद्यामं तेन लिंगन्तु कारयेत् ॥ 17 ॥
दोलायन्त्रे सारनाले जम्बीरस्थं दिनं पचेत् ।

रसलिंगपूजनंतत्फलंच –

तल्लिंगं पूजयेत्तत्र सुशुभैरुपचारकैः ॥ 18 ॥
लिंगकोटिसहस्रस्य यत्फलं सम्यगर्चनात् ।
तत्फलं कोटिगुणितं रसलिंगार्चनाद् भवेत् ॥ 19 ॥

ब्रह्महत्यासहस्रणिगोहत्याश्चायुतानि हि ।
तत्क्षणाद्विलयं यान्ति रसलिंगस्य दर्शनात् ॥ 20 ॥
स्पर्शनात्प्राप्यते मुक्तिरिति सत्यं शिवोदितम् ॥ 21 ॥
आग्नेय्यां श्रीमघोरेण मन्त्रराजेन चार्चयेत् ।

रसलिंगध्यानम् –

अष्टादशभुजं शुभ्रं पंचवक्त्रं त्रिलोचनम् ।
प्रेतारूढं नीलकण्ठं रसलिंगं विचिन्तयेत् ॥ 22 ॥

रसांकुशाध्यानम् –

तस्योत्सङ्गे महादेवीमेकवक्त्रां चतुर्भुजाम् ।
अक्षमालांकुशं दक्षे वामे पाशाभयं शुभम् ॥
दधतीं तप्तहेमाभां पीतवस्त्रां विभावयेत् ॥ 23 ॥

रसांकुशामन्त्रम् –

"वाङ्मयी श्रीः कामराजशक्तिबीजं रसांकुशा-
यैः नमः समा द्वादशांशैव ज्ञैया विद्या रसांकुशा" ॥ 24 ॥

रसांकुशापूजाविधिः –

अनया पूजयेद्देवीं गन्धपुष्पाक्षतादिभिः ॥ 25 ॥
नन्दीभृङ्गीमहाकालकुलीरान्पूर्वदिक्क्रमात् ।
पूजयेन्नाममन्त्रैश्च प्रणवादिनमोन्तकैः ॥ 26 ॥
एवं नित्यार्चनं तत्र कर्तव्यं रससिद्धये ॥ 27 ॥

रसविद्यादीक्षाविधिः –

रसविद्या शिवेनोक्ता दातव्या साधकाय वै ।
यथोक्तेन विधानेन गुरुणा मुदितात्मना ॥ 28 ॥
सुमुहूर्ते सुनक्षत्रे चन्द्रतारावलान्विते ।
कलशं तोयसम्पूर्णं हेमरत्नफलैर्युतम् ॥ 29 ॥
स्थापयेद्रसलिंगाग्रे दिव्यवस्त्रेण वेष्टितम् ।
गन्धपुष्पाक्षतैर्धूपैर्नैवेद्यैश्च सुपूजयेत् ॥ 30 ॥
पूजान्ते हवनं कुर्याद्योनिकुण्डे सुलक्षणे ।
तिलाज्यैः पायसैः पुष्पैः शतपुष्पादिकैः पृथक् ॥ 31 ॥
अघोरेण रसांकुश्या होमान्ते शिष्यमाह्वयेत् ।
कालिनीशक्तिसंयुक्तं रससिद्धिपरायणम् ॥ 32 ॥

कालिनीस्त्री लक्षणम् –

यस्यास्तु कुंचिताः केशाः श्यामा या पद्मलोचना ।
सुरूपा तरुणी भिन्ना विस्तीर्णजघना शुभा ॥ 33 ॥
संकीर्णहृदया पीनस्तनभारेण नम्रिता ।
चुम्बनालिंगनस्पर्शकोमला मृदुभाषिणी ॥ 34 ॥
अश्वत्थपत्रसदृशयोनिदेशसुशोभिता ।
कृष्णपक्षे पुष्पवती सा नारी कालिनी स्मृता ॥ 35 ॥
रसबन्धे प्रयोगे च उत्तमा सा रसायने ।

कालिनीकरणविधिः –

तदभावे सुरूपा तु या काचित्तरुणांगना ॥ 36 ॥
तस्या देयं त्रिसप्ताहं गन्धकं घृतसंयुतम् ।
कर्षैककं प्रभाते तु सा भवेत्कालिनीसमा ॥ 37 ॥

शिष्यदीक्षाविधिः –

एवं शक्तियुतो योऽसौ दीक्षयेत्तं गुरूत्तमः ॥ 38 ॥
सुस्नातमभिषिंचेत् मन्त्रेण कलशोदकैः ।
अघोरामंकुशीं विद्यां दद्याच्छिष्याय सद्गुरुः ॥ 39 ॥
यथाशक्त्या सुशिष्येण दातव्या गुरुदक्षिणा ॥ 40 ॥
अथाज्ञया गुरोर्मन्त्रं लक्षं लक्षं पृथग्जपेत् ।
अनया पूजयेद्देवीमिमां विद्यां रसांकुशीम् ॥ 41 ॥
दशांश जुहुयात्कुण्डे त्रिकोणे हस्तमात्रके ।
जातिपुष्पं त्रिमध्वक्तं पूर्णान्ते कन्यकार्चनम् ॥ 42 ॥
कृत्वाथ प्रविशेच्छालां शुद्धां लिप्तां सवेदिकाम् ॥ 43 ॥

रससाधनाविधिः –

षट्कोणं मण्डलं तत्र सिन्दूरेण द्विहस्तकम् ।
वेदिकायां लिखेत्सम्यक् तद्बहिश्चाष्टपत्रकम् ॥ 44 ॥
कमलं चतुरस्त्रंच चतुर्द्वारैः सुशोभितम् ।
कर्णिकायां न्यसेत्खल्वं लोहजं स्वर्णलेखितम् ॥ 45 ॥
तन्मध्ये रसराजं तु पलानां शतमात्रकम् ।
पंचाशत्येचविंशद्वा पूजयेद्रसलिंगवत् ॥ 46 ॥
वज्रवैक्रान्तवज्राभ्रकान्तपाषाणटंकणम् ।
भूनागः शक्तयश्चैताः षट्कोणे पूजयेत्क्रमात् ॥ 47 ॥

गन्धतालककासीसशिलाकंकुष्ठाभूषणम् ।
राजावर्तो गैरिकंच ख्याता उपरसा अमी ॥ 48 ॥
पूज्या अष्टदलेष्वेते पूर्वादीशानुगंक्रमात् ॥ 49 ॥
रसकं विमला ताप्यं चपला तुत्थमंजनम् ।
हिंगुलं सस्यकंचैव ख्याता एते महारसाः ॥ 50 ॥
पूर्वादीशानपर्यन्तं पत्राग्रेषु प्रपूजयेत् ।
पूर्वद्वारे स्वर्णरौप्ये दक्षिणे ताम्रसीसके ॥ 51 ॥
पश्चिमे वंगकान्तौ च उत्तरे मुण्डतीक्ष्णके ।
सर्वमेतदघोरेण पूजयेदंकुशान्वितम् ॥ 52 ॥
बिडं कांजिकयन्त्राणि क्षारमृल्लवणानि च ।
कोष्ठी मूषा वंकनाली तुषांगारवनोपलाः ॥ 53 ॥
भस्त्रिका दण्डिकानैका शिलाखल्वान्युलूखलम् ।
स्वर्णकारोपकरणं समस्ततुलनानि च ॥ 54 ॥
मृत्काष्ठताम्रलोहोत्थपात्राणि विविधानि च ।
दिव्यौषधीनां वर्गाश्च रंजकस्नेहनानि च ॥ 55 ॥
एतानि द्वारबाह्ये तु मूलमन्त्रेण पूजयेत् ॥ 56 ॥

अथमूलमन्त्रः –

वांगमायां ह्रीं ततः क्षेंचक्षमश्च पंचाक्षरो मनुः ।
अनेन मूलमंत्रेण भैरवं तत्र पूजयेत् ॥ 57 ॥
सर्वेषां रससिद्धानां नाम संकीर्तयेत्तदा ॥ 58 ॥

रससिद्धनामानि–

व्यालाचार्यश्चन्द्रसेनः सुबुद्धिर्नरवाहनः ।
नागार्जुनो रत्नघोषः सुरानन्दो यशोधनः ॥ 59 ॥
इन्द्रधूमश्च माण्डव्यश्चर्मटी शूरसेनकः ।
आगमो नागबुद्धिश्च खण्डः कापालिको मतः ॥ 60 ॥
कामारिस्तान्त्रिकः शम्भुर्लंको लंपकशारदौ ।
वाणासुरो मुनिश्रेष्ठो गोविन्दः कपिलो बलिः ॥ 61 ॥
एते सर्वे तु सूतेन्द्रा रससिद्धा महाबलाः ।
चरन्ति सर्वलोकेषु नित्या भोगपरायणाः ॥ 62 ॥
सप्तविंशतिसंख्यका रससिद्धिप्रदायकाः ।
वन्द्याः पूज्याः प्रयत्नेन ततः कुर्याद्रसार्चनम् ॥ 63 ॥

रसार्चनविधिः –

हर्षयन्द्विजदेवानां तर्पयेदिष्टदेवताः ।
कुमारीयोगिनीयोगीश्वरान्मेलकसाधकान् ॥
तर्पयेत्पूजयेद्भक्त्या यथाशक्त्यनुसारतः ॥ 64 ॥
इत्येवं सर्वसम्भारयुक्तं कुर्याद्रसोत्सवम् ।
सर्वविघ्नप्रशान्तार्थं सर्वेप्सितफलप्रदम् ॥ 65 ॥

मन्त्रदीक्षाविनारसासिद्धिः –

अन्यथा यो विमूढात्मा मन्त्रदीक्षाक्रमाद्विना ।
कर्तुमिच्छति सूतस्य साधनं गुरुवर्जितः ॥ 66 ॥
नासौ सिद्धिमवाप्नोति यत्नकोटिशतैरपि ।
तस्मात्सर्वप्रयत्नेन शास्त्रोक्तां कारयेत्क्रियाम् ॥ 67 ॥
सम्यक्साधनसोद्यमा गुरुयुता राजाज्ञयाऽलंकृता
नानाकर्मपराङ्मुखा रसपराश्चाढ्या जनैश्चार्च्यिताः ।
मात्रायन्त्रसुपाककर्मकुशलाः सर्वौषधे कोविदाः ।
तेषां सिध्यति नान्यथा विधिबलाच्छ्रीपारदः ॥ 68 ॥

रसशास्त्रदानप्रयोजनम् –

रसशास्त्रं प्रदातव्यं विप्राणां धर्महेतवे ।
राज्ञे वैश्याय वृत्यर्थं दास्यार्थीमितरस्य च ॥ 69 ॥

रससिद्धौसर्वसिद्धिः –

गुरौ तुष्टे शिवस्तुष्येच्छिवे तुष्टे रसस्तथा ।
रसे तुष्टे क्रियाः सर्वाः सिध्यन्त्येव न संशयः ॥ 70 ॥

रसविद्यायाः गोप्यत्वम् –

रसविद्या दृढं गोप्या मातुर्गुह्यमिव ध्रुवम् ।
भवेद्वीर्यवती गुप्ता निर्वीर्या च प्रकाशनात् ॥ 71 ॥
रोगिणा बहुभिर्ज्ञातं भवेन्निर्वीर्यमौषधम् ।
न रोगिविदितं कार्यं बहुभिर्विदितं तथा ॥ 72 ॥

इति श्री वैद्यपतिसिंहगुप्तस्यसूनोर्वाग्भटाचार्यस्य कृतौ रसरत्नसमुच्चये शिष्योपनयनं नाम षष्ठोऽध्यायः ।